श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

विल्लूर् नडादूर् श्री श्रीनिधेः कृतिषु

# ॥ कावेरीदशकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ कावेरीदशकम् ॥

कविताजितकल्लोलिकन्यकाकान्तवक्षसे।
करुणादिगुणाढ्याय कमलानिधये नमः॥

सह्यजाते ! नमस्तुभ्यं पापजातेन पीडितम्।
जानती विनतं मातः ! दीनं मां परिपालय॥ **1** ॥

कवेरात्मजातां सुवर्णाङ्गभङ्गिं
रसानां प्रवाहं मनोज्ञं वहन्तीम्।
पदानां प्रघाते ध्वनिं सन्दिशन्तीं
महाकाव्यपङ्क्तिं महान्तो विदुस्त्वाम्॥ **2** ॥

साकेतसामीप्यजुषा सरय्वा
सह्याद्रिकन्यायितमित्यवैमि।
सक्तो यदीये सलिले स रङ्गी
सदात्र तत्सन्निधिमातनोति॥ **3** ॥

मातः ! काञ्चनवाहिनि ! त्वमुचिता रत्नाकरप्रेयसी
रत्नं काञ्चनसङ्गतं हि सुभगं सर्वैरपि स्तूयते।
गङ्गाद्यास्सरितश्शुभाः क्षितितले पाथस्समृद्धाः पुनः
पाथोधेरुचिताः प्रिया इति वयं मन्यामहे तस्य ताः॥ **4** ॥

कवेरकन्ये ! कनकाभिधाने !
कल्लोलजालैः कमनीयगात्रि !।

कठोरसंसारकलिप्रवेग -
कालानलैः पालय मां प्रतप्तम् ॥ 5 ॥

श्रीभाष्यवाणीव विभाति वेणी
मातर्जलानां तव सह्यकन्ये !।
तीर्थैर्निषेव्या नितरां प्रसन्ना
निर्धूतपापा निगमान्तवन्द्या ॥ 6 ॥

प्रभां भजन्ती समये यथावत् -
प्रकाशयन्ती गुणमक्षरान्तः।
पदे पदे प्रत्ययमादधाना
त्वं तर्क्यसे पाणिनिभारतीति ॥ 7 ॥

कलधौततरङ्गिणि ! प्रिये !
कमलाया जनकस्य वारिधेः।
कलिकालजकल्मषावृतं
कलयेथा मम वर्ष्म पावनम् ॥ 8 ॥

कवेरकन्ये ! कलिकल्मषघ्नि !
कवीन्द्रभट्टार्यनुतप्रभावे !।
कपीन्द्रसंसेव्यकृतावगाहे !
कवौ मयि त्वं करुणां कुरुष्व ॥ 9 ॥

सङ्क्रामजातैः क्रमशो वृता त्वं
यैरत्र तैस्तैरयनं प्रसिद्ध्येत्।
नक्तं दिवं यैर्बहुशस्सुतारा -
संवत्सराणां सरणिर्विभाति ॥ 10 ॥

॥ इति कावेरीदशकं समाप्तम् ॥